न लिङ्गाराधनादन्यत् पुरा वेदे चतुर्ष्वपि ।
विद्यते सर्व्वशास्त्राणामेष एव सुनिश्चित: ॥
भुक्तिमुक्तिप्रदं लिङ्गं विविधापन्निवारणम् ।
पूजयित्वा नरो नित्यं शिवसायुज्यमाप्नुयात् ॥
सर्व्वमन्यत् परित्यज्य क्रियाजालमशेषत: ।
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ॥"
इति स्कन्दपुराणम् ॥*॥
"अश्वमेधसहस्राणि वाजपेयशतानि च ।
महेशार्च्चनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥"
इति मत्स्यसूक्त १६ पटल: ॥
"बहुनात्र किमुक्तेन चराचरमिदं जगत् ।
शिवलिङ्गं समभ्यर्च्च्य स्थितमत्र न संशय: ॥"
इति लिङ्गपुराणम् ॥*॥
"शिवस्य पूजनाद्देवि चतुर्व्वर्गाधिपो भवेत् ।
अष्टैश्वर्य्ययुतो मर्त्य: शम्भुनाथस्य पूजनात् ।
स्वयं नारायणेनोक्तं यदि शम्भुं प्रपूजयेत् ॥
स्वर्गे मर्त्ये च पाताले ये देवा: संस्थिता: सदा ।
तेषां पूजा भवेद्देवि शम्भुनाथस्य पूजनात् ॥"
इति लिङ्गपुराणम् ॥*॥
"असारे खलु संसारे सारमेतच्चतुष्टयम् ।
काश्यां वास: सतां सङ्गो गङ्गाम्भ: शम्भु-
पूजनम् ॥"
इति षट्कर्म्मदीपिकाधृतकालोत्तरे नारद-
वाक्यम् ॥ * ॥
"अग्निहोत्रास्त्रिवेदाश्च यज्ञाश्च बहुदक्षिणा: ।
शिवलिङ्गार्च्चनस्यैते कोट्यंशेनापि ते समा: ॥
छित्त्वा भित्त्वा च भूतानि हित्वा सर्व्वमिदं
जगत् ।
यजेद्देवं विरूपाक्षं न स पापेन लिप्यते ॥
अनेकजन्मसाहस्रं भ्राम्यमाणश्च योनिषु ।
क: समाप्नोति वै मुक्तिं विना लिङ्गार्च्चनं नर: ॥"
इति स्कन्दपुराणम् ॥*॥
"ब्राह्मण: क्षत्त्रियो वैश्य: शूद्रो वाप्यनुलोमज: ।
पूजयेत् सततं लिङ्गं तत्तन्मन्त्रेण सादरम् ॥"
तत्तन्मन्त्रेणेति यथायोग्यं वैदिकतान्त्रिकनाम-
मन्त्रेणेत्यर्थ: । इति वीरमित्रोदयधृतस्कन्द-
पुराणम् ॥ * ॥
"मूले ब्रह्मा तथा मध्ये विष्णुस्त्रिभुवनेश्वर: ।
रुद्रोपरि महादेव: प्रणवाख्य: सदाशिव: ॥
लिङ्गवेदी महादेवी लिङ्गं साक्षान्महेश्वर: ॥
तयो: प्रपूजनान्नित्यं देवी देवश्च पूजितौ ॥"
इति लिङ्गपुराणम् ॥*॥

अथ पारदशिवलिङ्गमाहात्म्यम् ।

"ज्योतिर्म्मयं महालिङ्गं कैलासनगरे प्रिये ।
तस्यैव षोड़शांशेन काश्यां विश्वेश्वर: स्थित: ॥
पूर्णलिङ्गं महेशानि शिवबीज न चान्यथा ।
शिलार्च्चने यथा ब्रह्म लक्ष्मीनारायण: परम् ।
पारदस्य शतांशेको लक्ष्मीनारायणो न हि ॥
पकारं विष्णुरूपञ्च आकारं कालिका स्वयम् ।
रेफं शिवं दकारञ्च ब्रह्मरूपं न चान्यथा ॥
पारदं परमेशानि ब्रह्मविष्णुशिवात्मकम् ।
यो यजेत् पारदं लिङ्गं स एव शम्भुरव्यय: ॥
आजन्ममध्ये यो देवि एकदा यदि पूजयेत् ।
स एव धन्यो देवेशि स ज्ञानी स च तत्त्ववित् ॥
स ब्रह्मवेत्ता स धनी स राजा भुवि पूज्यते ।
अणिमादिविभूतीनामीश्वर: साधकोत्तम: ॥"*॥

अथ पारदशिवलिङ्गनिर्म्माणविधि: ।

"पारदे शिवनिर्म्माणे नानाविघ्नं यत: प्रिये ।
अतएव महेशानि शान्तिस्वस्त्ययनं चरेत् ॥
पारदं शिवबीजं हि ताड़नं हि न कारयेत् ।
ताड़नाद्वित्तनाश: स्यात्ताड़नाद्वित्तहीनता ।
ताड़नाद्रोगयुक्तत्वं ताड़नान्मरणं भवेत् ॥"
इति मातृकाभेदतन्त्रे ८ पटल: ॥*॥

अथ शिवलिङ्गोत्पत्ति: ।

ब्रह्मोवाच ।

"पुरा त्वां चञ्चलं ज्ञात्वा त्वदग्रे न प्रकाशितम् ।
इदानीं योगिनं ज्ञात्वा कथयामि न संशय: ॥
अतिगुह्यमतिगुह्यमतिगुह्यं न संशय: ।
गोपितव्यं गोपितव्यं गोपितव्यं त्वयापि च ॥
शम्भुना गोपितं तन्त्रे तन्त्रान्तरे प्रकाशितम् ।
शृणु तत् कथयाम्यद्य सावधानोऽवधारय ॥
सर्गादौ विविधा: सर्गा मया सृष्टा हि नारद ।
देवदानवदैत्याश्च गन्धर्व्वयक्षराक्षसा: ॥
सर्व्वे जीवगणा: श्रेष्ठा मैथुनाज्जायते प्रजा ।
केवलं हि शिव: शम्भुर्दारग्रहणकर्म्मणि ॥
कदापि न मनश्चक्रे दृष्ट्वा चिन्तापरा: सुरा: ।
मामेव शरणं जग्मु: सेन्द्रा देवासुरादय: ॥
प्रणिपत्य स्तुतिं कृत्वा उपतस्थु: समाहित: ।
प्रोचु: प्राञ्जलय: सर्व्वे भयाद्गद्गदमानसा: ॥

देवाद्या ऊचु: ।

उद्वाहिता वयं सर्व्वे भवानपि जनार्द्दन: ।
केवलं हि महादेवो देवदेवो जगत्पति: ॥
विवाहे न मनश्चक्रे कथा वा मोक्ष्यते शिव: ।
उपायं चिन्तय विभो सदार: कथमीश्वर: ।
येन स्यात्सगतां नाथस्तत् कुरुष्व दयानिधे ॥
इति श्रुत्वा वचस्तेषां ततो ब्रह्मा प्रजापति: ।
सह तैर्गरुड़ारूढ़ं जगाम कमलासन: ।
उवाच तं जगन्नाथं विष्णुं कमललोचनम् ॥

ब्रह्मोवाच ।

सृष्टा मया सुरश्रेष्ठ मानुषा मैथुनोद्भवा: ।
सर्व्वे स्त्रैणा विना शम्भुं यत् कर्त्तव्यं वदस्व मे ॥

श्रीभगवानुवाच ।

एभि: सह महाबाहो गच्छामस्त्वमहं शिवम् ।
कर्त्तव्यं सूचितं तेन अनुज्ञातैर्यथाविधि ।
किन्तु तद्योग्यनारीन्तु विवाहार्थं प्रकल्पय ॥

ब्रह्मोवाच ।

दक्षं गच्छामहे सर्व्वे अनुज्ञापय तं हरे ।
आद्याशक्तिं महामायां प्रसादयतु वै लघु ॥
कन्या भूत्वा महाशम्भुं मोहयिष्यति शङ्करम् ।
एवमुक्ता तु तै: सार्द्धं जग्मतुर्विधिकेशवौ ।
यत्र दक्षो महातेजा: प्रोचतु: कार्य्यमात्मन: ॥
उवाच दक्षं तद्युक्तं तपस्तप्तुं प्रजापति: ।
ब्रह्मा विष्णुश्च सर्व्वे ते तपसा तोषयेत्त्विकाम् ॥
आविर्ब्बभूव सा देवी कालिका जगदीश्वरी ।
प्राह मां व: किमर्थन्तु समुत्कण्ठा: सुरासुरा: ॥

देव्युवाच ।

शीघ्रं रूपं यथाकामं भवतां प्रार्थने फलम् ।
अचिरात् तत्प्रदास्यामि सत्यं सत्यं न संशय: ॥

देवाद्या ऊचु: ।

भूत्वा तु दक्षकन्या त्वं शङ्करं परिमोहय ।
अस्माकं वाञ्छितञ्चैतत् कुरु सिद्धिं सदा शिवे ॥
एतत् श्रुत्वा वचस्तेषां निरीक्ष्य कमलासनम् ।
उवाच विस्मयाविष्टा कालिका जगदीश्वरी ॥

देव्युवाच ।

शम्भुरद्यतनो बाल: किं मां सन्तोषयिष्यति ।
मम योग्यं पुमांसन्तु अन्यं वै परिकल्पय ॥

ब्रह्मोवाच ।

शम्भु: सर्व्वगुरुर्देवो ह्यस्माकं परमेश्वर: ।
महासत्त्वो महातेजा: स ते तोषं करिष्यति ॥
शम्भुतुल्य: पुमान्नास्ति कदाचिदपि कुत्रचित् ।
इत्युक्ता ब्रह्मणा देवी बाढ़मित्याह चेश्वरी ।
दक्षाय दर्शनं दत्त्वा उवाच उच्यतां वर: ॥
दक्षोऽपि दृष्ट्वा तां देवीं खड़्गकर्त्तृधरां पराम् ।
खर्व्वां लम्बोदरीं व्याघ्रचर्म्मावृतकटिस्थलीम् ॥
नीलोत्पलकपालाढ्यकरयुग्मां वरप्रदाम् ।
कृतकृत्यमिवात्मानं मेने दक्ष: प्रजापति: ॥

दक्ष उवाच ।

यदि मे वरदासि त्वं देवानामपि वाञ्छितम् ।
मदीयतनया भूत्वा शङ्करं किल मोहय ॥
तथेत्युक्त्वा जगद्धात्री अन्तर्द्धानं गता तदा ।
देवताश्च ततो गत्वा यत्र तेपे तपो हर: ॥
सस्त्रीका: परमात्मानमुपतस्थुर्जगत्पतिम् ।
प्रणेमुस्तुष्टुवुर्भक्त्या प्राहुर्गद्गदभाषिण: ॥

देवाद्या ऊचु: ।

भगवन् देवदेवेश लोकनाथ महाशय ।
वयं सर्व्वे तु सस्त्रीका: सृष्ट्यर्थं परमेश्वर ।
अतस्त्वं कुरु चोद्वाहं सृष्टिरक्षा यथा भवेत् ॥
दक्षगेहे महाकाली मायेति परिकीर्त्तिता ।
जाता ते प्रीतये शम्भो सा ते योग्या न
संशय: ॥

ईश्वर उवाच ।

भवतां प्रीतये सम्यक् करिष्ये नात्र संशय: ।
उद्योग: क्रियतां क्षिप्रं विवाहाय ममैव हि ॥
इत्युक्तास्तु सुरा: सर्व्वे ईश्वरेण महात्मना ।
कृतकृत्या गता: सर्व्वे भवनं सर्व्वसुन्दरम् ॥
दक्षाय कथयामासु: शङ्करेणोदितं वच: ।
ततो विवाहं निर्व्वर्त्य कृतकृत्या यथा गता: ॥
गता: सर्व्वे महेशोऽपि सत्या सह तदा गृहम् ।
जगाम रेमे सत्या च चिरं निर्भरमानस: ॥
अथ काले कदाचित्तु सत्या सह महेश्वर: ।
रेमे व शेके तं सोढुं सती श्रान्ताभवत्तदा ॥
उवाच दीनया वाचा देवदेवं जगद्गुरुम् ।
भगवन्नहि शक्नोमि तव भारं सुदु:सहम् ।
क्षमस्व मां महादेव कृपां कुरु जगत्पते ॥
निशम्य वचनं तस्या भगवान् वृषभध्वज: ।
निर्भरं रमणं चक्रे गाढ़ं निर्द्दयमानस: ॥